दिनाङ्क :- 28.04.2025

प्रात: - 06:55

## मन की बात

प्रधानमन्त्री नरेन्द्रमोदी प्रोक्तवान् यत् एकतां आतंकवादं च विरुध्य सङ्घर्षे समेषां भारतीयानां एकता देशस्य सर्वोत्तमा शक्तिः। आकाशवाण्यां मन की बात इत्येतस्मिन कार्यक्रमे श्री मोदी राष्ट्रं सम्बोधयन् जनान् समाश्वसितवान् यत् पहलगाम- आतंक्याक्रमणस्य अभियुक्ताः निश्चयेन दण्डिताः स्युः। प्रधानमन्त्री समुदीरितवान् यत् आतंक्याक्रमणानन्तरं वैश्विक- नेतारः दूरभाष माध्यमेन पत्रमाध्यमेन च आक्रमणस्य निन्दां कृतवन्तः। श्री मोदी जम्मूकश्मीरे शान्तिस्थापनायाः, लोकतन्त्रसुदृढीकरणस्य, अथ पर्यटकानां संख्यावृद्धिविषये अपि स्वविचारान् प्रकटितवान्। श्री मोदी मासेऽस्मिन् आर्यभट्ट- उपग्रह- प्रक्षेपणस्य स्वर्णजयन्तीवर्षपूर्तिमालक्ष्य प्रसन्नतां प्रकटितवान्।

## राष्ट्रियान्वेषणाभिकरणं एन आई ए

राष्ट्रियान्वेषणाभिकरणेन एन आई ए इत्येतेन पहलगाम- आतंक्याक्रमणस्य अन्वेषणं तीव्रगत्या समारब्धम्। एकस्मिन् वक्तव्ये अभिकरणेन एतेन प्रोक्तं यत् दलानि घटनास्थले समुपस्थितैः जनैः सह वार्ताक्रमं साधयन्ति, ये जनाः बैसरन- उपत्यकायां आक्रमणसमये समुपस्थिताः आसन्। एतदन्तरा, जम्मूकश्मीर- आरक्षिबलेन द्वौ आतंकिनौ निगडितौ।

## गोयलः

वाणिज्योद्योगमन्त्री पीयूषगोयलः प्रोक्तवान् यत् भारतेन अग्रिमेषु पञ्चविंशतितः त्रिंशत् वर्षेषु ट्रिलियन डॉलर इत्यात्मिकीं अर्थव्यवस्थां तदा एव प्राप्तुं शक्यते यदा स्वस्थ- नागरिकैः एषा अर्थव्यवस्था संचालयेत्। नवदेहल्यां विश्व- स्वास्थ्य- शिखर- सम्मेलनं सम्बोधयन् श्री गोयलः प्रतिपादितवान् यत् शासनेन प्रवर्तितायाः

प्रत्येकस्याः योजनायाः पदक्षेपस्य च उद्देश्यं स्वानागरिकाणां स्वास्थ्ये, समग्रविकासे च साहाय्यं वर्तते।

**<u>मंदसौर दुर्घटना</u>**

मध्यप्रदेशस्य मंदसौर- जनपदे जातां मार्ग- दुर्घटनाम् अभिलक्ष्य प्रधानमन्त्री नरेन्द्रमोदी शोकं प्रकटितवान्। अवधेयं यत् मन्दसौर-स्थले दुर्घटनायां दश जनाः मृताः, चत्वारश्च हताहताः। संचार पटले श्रीमोदी दुर्घटनायां मृतकानां प्रियजनान् प्रति स्वीय- संवेदनां अभिव्यक्तवान्।

**<u>सीडीएस- राजनाथ</u>**

रक्षामन्त्री राजनाथसिंहः सीडीएस इति प्रमुख- सैन्य- अधिकारिणा अनिल चौहान इत्यमुना साकं मेलनं कृतवान्। पहलगाम- आतंक्याक्रमणविषये रक्षामन्त्री सैन्य प्रमुखेण चर्चां कृतवान्। सूत्रानुसारि चर्चान्तर्गतं अनिल चौहानः आतंकवादं विरुध्य रणनीति- सञ्जा विषये विस्तरेण योजनां प्रस्तुतवान्। उपवेशनेडिस्मन् नैके सैन्याधिकारिणश्चापि समुपस्थिताः आसन्।

**आईपीएल**

इण्डियन- प्रीमीयर- लीग् इत्येतस्यां क्रिकेट्- लीग- प्रतिस्पर्धायां गतदिने क्रीडिते- द्वन्द्वे मुम्बई- इण्डियन्स् इत्येतेन लखनऊ- सुपर- जायंट्स् इत्येतत् दलं पराजितम्। अपरे द्वन्द्वे रॉयल- चैलेंजर्स बैंग्लोर इत्येतेन दलेन देहली कैपिटल्स् इति दलं पराजितम्।

प्रतिस्पर्धायाम् अद्य राजस्थान रॉयल्स - गुजरात टाइटंस इत्येतयोः दलयोः मध्ये द्वन्द्वं भवेत्।